# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ७ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.E.- 2.3.3. New ) | गुणाः – ७० |
| दिनाङ्कः – १६/१०/२०१९ | सन्दर्भग्रन्थः श्रीहरिवाक्यसुधासिन्धुः | समयः –८.०० तः ११.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्। (१०)**

(१) पुरुषप्रकृतिकालानां लक्षणानि द्वादशतरङ्गानुसारं लिखत।

(२) अन्तर्यामिरूपेण शक्तिद्वययुतश्च सः।
प्रतिजीवं स्थितो दत्ते तत्तत्कर्मफलं प्रभुः॥
– इति श्लोकं सेतुमालाटीकानुगुणं व्याख्यात।

(३) श्रीकृष्णो भगवानस्ति सर्वकारणकारणम्।
प्रकाशकानां सर्वेषां स चैवास्ति प्रकाशकः॥
– इति श्लोकं सान्वयं व्याख्यात।

**प्रश्नः २ कस्यचिद् एकस्य प्रश्नस्य समाधानं कुरुत । (१०)**

(१) द्वादशतरङ्गानुगुणं चतुर्विंशतितत्त्वानां लक्षणानि लिखत।

(२) भगवान् मायिकै इन्द्रियैः ग्राह्यः उत न ? टीकानुगुणं परिचाययत।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ। (१०)**

(१) मुक्तेः चातुर्विध्यं त्रिचत्वारिंशत्तरङ्गानुगुणं स्पष्टयत।

(२) आत्मा नित्यो निर्विकारो भवत्येव निराकृतिः।
नैवास्य जन्ममृत्युश्च न सङ्गः पापकर्मणाम्॥
– इति श्लोकं सेतुमालाटीकानुगुणं व्याख्यात।

(३) निष्कामभक्तस्य लक्षणं यथाग्रन्थमुपपादयत।

**प्रश्नः ४ निम्नलिखितेषु प्रश्नेष्वेक एव समाधेयः। (१०)**

(१) धर्मज्ञानवैराग्यभक्तीनां चतुर्णामङ्गानां परस्परापेक्षां स्पष्टयत।

(२) साङ्ख्ययोगवेदान्तपञ्चरात्रैः चतुर्भिः शास्त्रैः परमात्मस्वरूपविज्ञानं परिचाययत।

## तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** (१०)

(१) अस्मिन् वपुषि जीवस्य परमात्मनश्च वेदितृत्वं कियत् ?

– इति शततमस्तरङ्गानुगुणं व्याख्यात।

(२) न तद्भासयते सूर्यो न शशाङ्को न पावकः।

यद्गत्वा न निवर्तन्ते तद्धाम परमं मम॥इति श्लोकं सेतुमालाटीकानुगुणं व्याख्यात।

(३) जीवः सामान्यविशेषरूपेण कुत्र तिष्ठति ? स्पष्टयत।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) षट्चत्वारिंशदधिकशततमतरङ्गानुसारं भगवतः स्वाभाविकीं प्रकृतिं परिचाययत।

(२) सेतुमालाटीकानुगुणं शततमणरङ्गस्य सारांशं सङ्गृह्णीत।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत।** (१०)

(१) रसाश्ववसुभूमिते – इति पदं संख्यया लिखत।

(२) उत्तमभूभुजः गृहं कुत्र ?

(३) प्रकृतिः नित्या वा अनित्या ?

(४) एकैकस्मिन् देहे जीव एक उत अनेकः ?

(५) मुक्तिः कतिविधा ?

(६) कः चतुर्विधां मुक्तिं नेच्छति ?

(७) सेतुमालाटीका केन विरचिता ?

(८) श्रीहरिवाक्यसुधासिन्धुग्रन्थः कस्य संस्कृतानुवादः ?

(९) भगवान् सगुणः उत निर्गुणः ?

(१०) श्रीहरिवाक्यसुधासिन्धौ कर्ताः कः ?

(११) पीताम्बरधरः कः ?

(१२) शततमो तरङ्गः कस्मिन् ग्रामे उक्तः ?

(१३) शततमे तरङ्गे केन प्रश्नः पुष्टः ?

(१४) श्रीहरिवाक्यसुधासिन्धौ कति तरङ्गाः सन्ति ?

(१५) भगावन् मायिकैः इन्द्रियैः गृह्यते न वा ?

--००--